IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# "पितृधनाधिकारिण:"

AUTHOR :Dr. Dayanidhi Mishra

QUALIFICATION : M.A & Ph.d in Dharmashastra (Sanskrit)

DESIGNATION : Lecture in Dharmashastra, At- Sri Sri Ananta Narayan Sanskrit College,Ayatpur,Kendrapara,Odisha.

ABSTRACT : अत्र विज्ञानेश्वरप्रणीतमिताक्षरायां दायभागांश:, c दायभागांश:,दिवंगतानां मम गुरुपादानां प्रो-किशोरचन्द्रमहापात्रमहोदयानां दायभागसमीक्षा इति विरचित:।एतेषां शास्त्रकाराणां मतान्यालोचनावसरे विज्ञायते यत् पितृधने केवलमपि पुत्राणामधिकारोस्ति।

REFERENCE :"याज्ञवल्क्यस्मृति:"(योगीश्वरयाज्ञवल्क्यव्यवहारअध्यायस्यदायभागांश:) "मनुस्मृति:"(महर्षिमनुनाविरचितमदायभागांश:) ,"गौतमधर्मसूत्रम्"(महर्षिगौतमविरचितदायभागांश:)

पितृधनाधिकारविषये विभिन्नैर्शास्त्रकारै. मतमिदं प्रतिपादितम्।अस्मिन् विषये त्रयाणां धर्मशास्त्रकाराणां मतमालोचनीयं भवति।ते भवन्ति यथा विज्ञानेश्वर:,जीनूतवाहन:,मित्रमिश्रश्च।एतेषु विज्ञानेश्वर: यन्मतं प्रतिपादयति तन्मतं जीमूतवाहनेन नाङ्गीक्रियते।तत्रादौ विज्ञानेश्वरस्य मतं याज्ञवल्क्येन प्रतिपादितम्-

विभागं चेत्पिताकुर्यादिच्छया विभजेत्सुतान्।

ज्येष्ठ वा श्रेष्ठभागेन सर्वे वा स्यु:समाशिन:।।

यस्मिन् समये पिता विभागं कर्तुमिच्छति तदा स्वेच्छया स्वधनं विभजेत्।पिता

विभागकर्तुं यदा इच्छति तदा द्विप्रकारकं विभागं कर्तुमर्हति।यथा-समविभाग:,विषमविभागश्च।विज्ञानेश्वर मतानुसारेण पितृधनविभागस्य कालत्रयम्।यथा-पित्रो: मरणा

त् परं पुत्राणामिच्छया प्रथमविभगकाल:,मातरिनिवृतरजस्कायां पितरिधननिस्पृहे तदनिच्छयापि पुत्राणामिच्छया द्वितीय विभागकाल:,जीवति पितरि तस्येच्छा तृतीयविभागकाल:।परन्तु अस्मिन् विषये जीमूतवाहनमतानुसारेण पितृधनविभागस्य कालद्वयम।यथा-पितु: पतितत्वनिस्पृहत्वोपरमै:स्वत्वापगम एक काल:।अपरकालो भवति स्वत्वे स

तीजीवति च तस्येच्छा इति द्वितीयकाल:।अत: पितृधनाधिकरिण: पुत्रा: भवन्ति। इमे पुत्रा: द्वादशविधा: भवन्ति।दायभाग प्रकरणे योगीश्वर याज्ञवल्क्य: विचारयति- औरस:,पुत्रिकापुत्र:,क्षेत्रज:,गूढज:,कानीन:,पौनर्भव:,दत्तक:,क्रीत:,कृत्रिम,स्वयंदत्त:,सहोढज:,अपविद्धश्चेति।अत: विज्ञायते यत् द्वादशपुत्रेषु आद्या:षड्दायादबान्धवत्वेन परिगणिता:।एते औरसादय: षड्पुत्रा: पितृधनाधिकारिणो भवन्ति।